# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – १**<br>(C.F.-2.3.3. Old Course) | गुणा: – ७० |
| विषय: – अनिवार्यसंस्कृतम् | | समय: -२.०० त: ०५.०० |
| दिनाङ्क: – ०४/१२/२०१८ | *सन्दर्भग्रन्थ: मध्यसिद्धान्तकौमुदी (व्याकरणेत्तरछात्राणां कृते)*<br>*: न्यायसिद्धान्तमुक्तावली (व्याकरणच्छात्राणां कृते)* | |

**मध्यसिद्धान्तकौमुदी ( व्याकरणेत्तरछात्राणां कृते )**

**प्रथमान्विति:**

**प्रश्न: १ निम्नाङ्कितेषु कयोश्चिद्द्वयो: सवृत्तिकं सोदाहरणञ्च निरूपणं कुरुत ।** **( १० )**

*(१) प्रातिपदिकार्य-लिङ्ग-परिमाण-वचनमात्रे प्रथमा।*

*(२) अधिशीङ्स्थासां कर्म।*

*(३) कालाध्वनोरत्यन्तसंयोगे।*

**प्रश्न: २ निम्नाङ्कितयो: कस्यचिदेकस्य निरूपणं कुरुत ।** **( १० )**

*(१) अधिकरणार्तथे सप्तम्या: प्रयोगं सोदाहरणं निरूपयत।*

*(२) गति-बुद्धि. . . . .सूत्रं प्रपूर्य सोदाहरणं निरूपयत।*

**द्वितीयान्विति:**

**प्रश्न: ३ निम्नाङ्कितासु साधनिकासु पञ्च साधनिका: ससूत्रं व्याख्येया: ।** **( १० )**

*(१) हरि: सेव्यते* *(२) अभिनिविशते सन्मार्गम्*

(३)परित: कृष्णम् (४) गोत्रेण गार्ग्य:

(५) अक्ष्णा काण: (६)अग्नये स्वाहा

(७) कृष्णस्य कृति:

**प्रश्न: ४ निम्नाङ्कितयो: कस्याप्येकस्य उत्तरं लिखत ।** **( १० )**

*(१) अन्यारादितरर्ते . . . . . सूत्रपूर्तिं कृत्वा व्याख्यां कुरुत।*

*(२) लक्षणेत्थम्भूत. . . . . . सूत्रपूर्तिं कृत्वा व्याख्यां कुरुत।*

## तृतीयान्विति:

**प्रश्नः ५ निम्नाङ्कितेषु पञ्चानां उत्तराणि लिखत ।** **( १० )**

*(१) उभसर्वतसो: . . . . . . . . . . कारिकां लिखत।*

*(२) दुह्याच पच् . . . . . .आदय: षोडश के ?*

*(३) अन्तरेण हरिं न सुखम् इति केन सूत्रेण सिद्ध्यति ?*

*(४) अभिरभागे इति सूत्रं किं निरूपयति ?*

*(५) नम: स्वस्ति. . . . . . सूत्रेण कुत्र कुत्र चतुर्थी भवति ?*

*(६) पञ्चम्यपाङ्परिभि: सूत्रस्य उदाहरणं स्पष्टं कुरुत।*

*(७) चर्मणि द्वीपिनं . . . . . .कारिकां लिखत।*

**प्रश्नः ६ निम्नाङ्कितयो: एकस्य उत्तरं लिखत ।** **( १० )**

*(१) कारकस्य व्युत्पत्तिं कारकनामानि च विलिख्य कर्मप्रवचनीयसंज्ञां निरूपयत।*

*(२) सम्प्रदान–अपादानयो: प्रधानसूत्रे विविच्य उदाहरणानि लिखत।*

## चतुर्थान्विति:

**प्रश्नः ७ निम्नाङ्कितेषु दशानां लघूत्तराणि लिखत ।** **( १० )**

*(१) कारकाणि कति ?*

*(२) परिमाणमात्रस्य उदाहरणं किम् ?*

*(३) अनुक्ते कर्मणि का विभक्ति: ?*

*(४) के कर्मप्रवचनीया:?*

*(५) समयायोगे का विभक्ति:?*

*(६) करणसंज्ञाविधायकं सूत्रं किम् ?*

*(७) 'दण्डेन घट:' केन सूत्रेण सिद्ध्यति ?*

*(८) 'अपाय' शब्दस्य कोऽर्थ: ?*

*(९) कृद्योगे अनुक्ते कर्तरि का विभक्ति: भवति ?*

*(१०) अतसर्वप्रत्ययस्य योगे का विभक्ति: भवति ?*

*(११) 'एनप्' प्रत्यान्तस्य किं उदाहरणम् ?*

*(१२) साधुनिपुणाभ्यां का विभक्ति:?*

*(१३) आधारस्य के त्रय: प्रकारा: ?*

*(१४) अप–आङ्–परि त्रयाणां योगे का विभक्ति: ?*

*(१५) मुक्तये हरिं भजति इति कस्योदाहरणम् ?*

## न्यायसिद्धान्तमुक्तावली ( व्याकरणच्छात्राणां कृते )

### प्रथमान्वितिः

**प्रश्नः १ निम्नलिखितेषु कयोश्चिद् द्वयोः व्याख्यात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) सामान्य द्विविधं प्रोक्तं परं चारपमेव च ।*
*द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥*

*(२) द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।*
*समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिता ॥*

*(३) अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।*
*प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥*

**प्रश्नः २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) न्यायसिद्धान्तमुक्तावल्यनुसारं मङ्गलाचरणं व्याख्याय मङ्गलवादं निबध्नीत ।*

*(२) तमसो द्रव्यत्वे पूर्वपक्षमुत्थाय खण्डयत ।*

### द्वितीयान्वितिः

**प्रश्नः ३ निम्नलिखितेषु कयोश्चिद् द्वयोः कारिकयोः व्याख्यां लिखत ।** **( १० )**

*(१) येन सह पूर्वभावः कारणमादाय वा यस्य ।*
*अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ॥*

*(२) क्षितिर्जलं तथा तेजः पवनो मन एव च ।*
*परापरत्वमूर्तत्वक्रियावेगाश्रया अमी ॥*

*(३) अनित्या तु तदन्या स्यात् सैवावययोगिनी ।*
*सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥*

**प्रश्नः ४ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) अन्यथासिद्धनिरूपणं यथाग्रन्थं प्रतिपादयत ।*

*(२) भूतात्मनोः साधर्म्यनिरूपणं लिखत ।*

### तृतीयान्वितिः

**प्रश्नः ५ निम्नलिखितेषु कयोश्चिद् द्वयोः व्याख्यात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) इन्द्रियं रसनं सिन्धुर्हिमादिर्विषयो मतः ।*
*उष्णः स्पर्शः तेजस्तु स्याद्रूपं शुक्लभास्वरम् ॥*

*(२) शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ।*
*तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥*

*(३) अलौकिकस्तु व्यापारास्त्रिविधः परिकीर्तितः ।*
*सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥*

**प्रश्नः ६ निम्नलिखितयोः कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत । (१०)**

*(१) अनुभूतिचातुर्विध्यं प्रदर्शयत।*

*(२) षड्विधसन्निकर्षान् निरूपयत।*

## चतुर्थान्वितिः

**प्रश्नः ७ निम्नाङ्कितेषु दशानाम् अतिलघूत्तराणि लिखत । (१०)**

*(१) पदार्थाः कतिविधाः ?*

*(२) कर्माणि कतिविधानि ?*

*(३) द्रव्येषु गुणकर्मणोः कः सम्बन्धः ?*

*(४) ज्ञेयत्वादिकं कस्य साधर्म्यम् ?*

*(५) कारणं कतिविधम् ?*

*(६) समवायिकारणत्वं कस्य एव भवति ?*

*(७) गुणाः कतिविधाः ?*

*(८) जले कति गुणाः भवन्ति ?*

*(९) पृथिव्यां रसः कतिविधः प्राप्यते ?*

*(१०) पवने कः स्पर्शः मतः ?*

*(११) जन्यानां जनकः कः ?*

*(१२) अलौकिकः व्यापारः कतिविधः ?*

*(१३) सन्निकर्षः कतिविधः ?*

*(१४) न्यायमते कति प्रमाणानि स्वीक्रियन्ते ?*

*(१५) न्यायसिद्धान्तमुक्तावलीकारः कः ?*

--००--